Datta Stavam

दत्तस्तवस्तोत्रम्

NityaPaath
nityapaath.com/datta-stavam/

SHLOKA · दत्तस्तवस्तोत्रम्

1 भूतप्रेतपिशाचाद्या यस्य स्मरणमात्रतः ॥
दूरादेव पलायंते दत्तात्रेयं नमामि तम् ॥ १॥

2 यन्नामस्मरणाद्दैन्यं पापं तापश्च नश्यति ॥
भीतिग्रहार्तिदुःस्वप्नं दत्तात्रेयं नमामि तम् ॥ २॥

3 दद्रुस्फोटककुष्ठादि महामारी विषूचिका ॥
नश्यंत्यन्येऽपि रोगाश्च दत्तात्रेयं नमामि तम् ॥ ३॥

4 संगजा देशकालोत्था अपि सांक्रमिका गदाः ॥
शाम्यंति यत्स्मरणतो दत्तात्रेयं नमामि तम् ॥ ४॥

5 सर्पवृश्चिकदष्टानां विषार्तानां शरीरिणाम् ॥
यन्नाम शांतिदं शीघ्रं दत्तात्रेयं नमामि तम् ॥ ५॥

6 त्रिविधोत्पातशमनं विविधारिष्टनाशनम् ॥
यन्नाम क्रूरभीतिघ्नं दत्तात्रेयं नमामि तम् ॥ ६॥

7 वैर्यादिकृतमंत्रादिप्रयोगा यस्य कीर्तनात् ॥
नश्यंति देवबाधाश्च दत्तात्रेयं नमामि तम् ॥ ७॥

8 यच्छिष्यस्मरणात्सद्यो गतनष्टादि लभ्यते ॥
य ईशः सर्वतस्त्राता दत्तात्रेयं नमामि तम् ॥ ८॥

9 जयलाभयशःकामदातुर्दत्तस्य यः स्तवं ॥
भोगमोक्षप्रदस्येमं पठेद्दत्तप्रियो भवेत् ॥ ९॥

Text checked against: स्तोत्रादिसंग्रहः (Stotradi Sangrah), Shri Vasudevananda Saraswati Granthamala no. 2, published by Vamana Dattatreya Gulavani, Ashadha shukla 1 Shaka 1874 = 23 June 1952; stotra no. 129. Meanings, audio and all scripts at nityapaath.com/datta-stavam/